GRAMMATICAL ANAYSIS OF TATTVA BODHA

Editor : Medhā Michika, AVG, Anaikatti



Published by:



Arsha Avinash Foundation
104 Third Street, Tatabad, Coimbatore 641012, India
Phone: + 91 9487373635
E mail: arshaavinash@gmail.com
www.arshaavinash.in

तत्त्वबोधः

Tattvabodhaḥ

Study material edited by Medhā Michika

तत्त्वबोधः

Tattvabodhaḥ

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम्।
मुमुक्षूणां हितार्थाय तत्त्वबोधोऽभिधीयते॥
vāsudevendrayogīndraṃ natvā jñānapradaṃ gurum ।
mumukṣūṇāṃ hitārthāya tattvabodho'bhidhīyate ।।

vāsudevendra-yogīndram 2/1

natvā 0

jñāna-pradam 2/1 gurum 2/1

mumukṣūṇām 6/3 hita-arthāya 4/1

tattva-bodhaḥ 1/1 abhidhīyate III/1

साधनचतुष्टयसम्पन्नाधिकारिणां मोक्षसाधनभूतं तत्त्वविवेकप्रकारं वक्ष्यामः।
sādhanacatuṣṭayasampannādhikāriṇāṃ
mokṣasādhanabhūtaṃ tattvavivekaprakāraṃ vakṣyāmaḥ ।

sādhana-catuṣṭaya-sampanna-adhikāriṇām 6/3

mokṣa-sādhana-bhūtam 2/1

tattva-viveka-prakāram 2/1

vakṣyāmaḥ I/3

साधनचतुष्टयं किम्?।
sādhanacatuṣṭayaṃ kim? ।

sādhana-catuṣṭayam 1/1 kim 1/1 ?

1) नित्यानित्यवस्तुविवेकः।
nityānityavastuvivekaḥ ।

nitya-anitya-vastu-vivekaḥ 1/1

2) इहामुत्रार्थफलभोगविरागः।
ihāmutrārthaphalabhogavirāgaḥ ।

iha-amutra-artha-phala-bhoga-virāgaḥ 1/1

3) शमादिषट्कसम्पत्तिः।
śamādiṣaṭkasampattiḥ ।

śama-ādi-ṣaṭka-sampattiḥ 1/1

4) मुमुक्षुत्वं चेति।
mumukṣutvaṃ ceti ।

mumukṣutvam 1/1

ca 0 iti 0

1) नित्यानित्यवस्तुविवेकः कः ?।
nityānityavastuvivekaḥ kaḥ? ।
नित्यवस्त्वेकं ब्रह्म तद्व्यतिरिक्तं सर्वमनित्यम्।
nityavastvekaṃ brahma tadvyatiriktaṃ sarvamanityam ।
अयमेव नित्यानित्यवस्तुविवेकः।
ayameva nityānityavastuvivekaḥ ।

nitya-anitya-vastu-vivekaḥ 1/1 kaḥ 1/1

nitya-vastu 1/1 ekam 1/1 brahma 1/1

tad-vyatiriktam 1/1 sarvam 1/1 anityam 1/1

ayam 1/1 eva 1/1 nityānityavastuvivekaḥ 1/1

2) विरागः कः ?।

virāgaḥ kaḥ? ।

इहस्वर्गभोगेषु इच्छाराहित्यम्।

ihasvargabhogeṣu icchārāhityam ।

virāgaḥ 1/1 kaḥ 1/1 ?

iha-svarga-bhogeṣu 7/3 icchā-rāhityam 1/1

3) शमादिषड्कसम्पत्तिः का ?।

śamādiṣaṭkasampattiḥ kā ।

शमो दम उपरमस्तितिक्षा श्रद्धा समाधानं चेति।

śamo dama uparamastitikṣā śraddhā samādhānaṃ ceti ।

śama-ādi-ṣaṭka-sampattiḥ 1/1 kā 1/1 ?

śamaḥ 1/1

damaḥ 1/1

uparamaḥ 1/1

titikṣā 1/1

śraddhā 1/1

samādhānam 1/1

ca 0

iti 0

i) शमः कः ?।

śamaḥ kaḥ? ।

मनोनिग्रहः।

manonigrahaḥ ।

śamaḥ 1/1 kaḥ 1/1 ?

manas-nigrahaḥ 1/1

ii) दमः कः ?।

damaḥ kaḥ? ।

चक्षुरादिबाह्येन्द्रियनिग्रहः।

cakṣurādibāhyendriyanigrahaḥ ।

damaḥ 1/1 kaḥ 1/1?

cakṣus-ādi-bāhya-indriya-nigrahaḥ 1/1

iii) उपरमः कः ?।

uparamaḥ kaḥ? ।

स्वधर्मानुष्ठानमेव।

svadharmānuṣṭhānameva ।

uparamaḥ 1/1 kaḥ 1/1?

svadharma-anuṣṭhānam 1/1 eva 0

iv) तितिक्षा का ?।

titikṣā kā ?।

शीतोष्णसुखदुःखादिसहिष्णुत्वम्।

śītoṣṇasukhaduḥkhādisahiṣṇutvam ।

titikṣā 1/1 kā 1/1?

śīta-uṣṇa-sukha-duḥkha-ādi-sahiṣṇutvam 1/1

v) श्रद्धा कीदृशी ?।

śraddhā kīdṛśī?।

गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा।

guruvedāntavākyeṣu viśvāsaḥ śraddhā ।

śraddhā 1/1 kīdṛśī 1/1 ?

guru-vedānta-vākyeṣu 7/3 viśvāsaḥ 1/1 śraddhā 1/1

vi) समाधानं किम् ?।

samādhānaṃ kim?।

चित्तैकाग्रता।

cittaikāgratā ।

samādhānam 1/1 kim 1/1 ?

citta-ekāgratā 1/1

4) मुमुक्षुत्वं किम् ?।
mumukṣutvaṃ kim ?।
मोक्षो मे भूयादितीच्छा।
mokṣo me bhūyāditīcchā ।

mumukṣutvam 1/1 kim 1/1?

mokṣaḥ 1/1 me 6/1 bhūyāt 1/1

iti 0 icchā 1/1

एतत् साधनचतुष्टयम्।
etat sādhanacatuṣṭayam ।
ततस्तत्त्वविवेकस्याधिकारिणो भवन्ति।
tatastattvavivekasyādhikāriṇo bhavanti ।

etat 1/1 sādhana-catuṣṭayam 1/1

tataḥ 0 tattva-vivekasya 6/1 adhikāriṇaḥ 1/3 bhavanti III/3

तत्त्वविवेकः कः ?।
आत्मा सत्यं तदन्यत् सर्वं मिथ्येति।
tattvavivekaḥ kaḥ?।
ātmā satyaṃ tadanyat sarvaṃ mithyeti ।

tattva-vivekaḥ 1/1 kaḥ 1/1

ātmā 1/1 satyam 1/1

tad-anyat 1/1 sarvam 1/1 mithyā 0

iti 0

आत्मा कः ?।

1) स्थूलसूक्ष्मकारणशरीराद् व्यतिरिक्तः

2) पञ्चकोशातीतः सन्

3) अवस्थात्रयसाक्षी

4) सच्चिदानन्दस्वरूपः सन् यस्तिष्ठति स आत्मा।

ātmā kaḥ ?।

sthūlasūkṣmakāraṇaśarīrād vyatiriktaḥ pañcakośātītaḥ san avasthātrayasākṣī saccidānandasvarūpaḥ san yastiṣṭhati sa ātmā ।

ātmā 1/1 kaḥ 1/1

sthūla-sūkṣma-kāraṇa-śarīrāt 5/1 vyatiriktaḥ 1/1

pañcakośa-atītaḥ 1/1 san 1/1

avasthā-traya-sākṣī 1/1

sat-cit-ānanda-svarūpaḥ 1/1 san 1/1

yaḥ 1/1 tiṣṭhati III/1

saḥ 1/1 ātmā 1/1

1) - i) स्थूलशरीरं किम् ?।

पञ्चीकृतपञ्चमहाभूतैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगायतनं शरीरम्

अस्ति जायते वर्धते विपरिणमतेऽपक्षीयते विनश्यतीति षड्विकारवद्

एतत् स्थूलशरीरम्।

sthūlaśarīraṃ kim ?।
pañcīkṛtapañcamahābhūtaiḥ kṛtaṃ satkarmajanyaṃ sukhaduḥkhādibhogāyatanaṃ śarīram asti jāyate vardhate vipariṇamate'pakṣīyate vinaśyatīti ṣaḍvikāravad etat sthūlaśarīram ।

sthūlaśarīram 1/1 kim 1/1

pañcīkṛta-pañca-mahābhūtaiḥ 3/3 kṛtam 1/1

sat-karma-janyam 1/1

sukha-duḥkha-ādi-bhoga-āyatanam 1/1 śarīram 1/1

asti III/1 jāyate III/1 vardhate III/1 vipariṇamate III/1

apakṣīyate III/1 vinaśyati III/1 iti 0 ṣaḍ-vikāravat 1/1

etat 1/1 sthūla-śarīram 1/1

1) - ii) **सूक्ष्मशरीरं किम् ?।**

अपञ्चीकृतपञ्चमहाभूतैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगसाधनं पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि पञ्चप्राणादयो मनश्चैकं बुद्धिश्चैकैवं सप्तदशकलाभिः सह यत्तिष्ठति तत्सूक्ष्मशरीरम्।

sūkṣmaśarīraṃ kim?।
apañcīkṛtapañcamahābhūtaiḥ kṛtaṃ satkarmajanyaṃ sukhaduḥkhādibhogasādhanaṃ pañcajñānendriyāṇi pañcakarmendriyāṇi pañcaprāṇādayo manaścaikaṃ buddhiścaikaivaṃ saptadaśakalābhiḥ saha yattiṣṭhati tatsūkṣmaśarīram ।

sūkṣma-śarīram 1/1 kim 1/1

apañcīkṛta-pañca-mahābhūtaiḥ 3/3 kṛtam 1/1

sat-karma-janyam 1/1

sukha-duḥkha-ādi-bhoga-sādhanam 1/1

pañca-jñāna-indriyāṇi 1/3

pañca-karma-indriyāṇi 1/3

pañca-prāṇa-ādayaḥ 1/3

manaḥ 1/1 ca 0 ekam 1/1

buddhiḥ 1/1 ca 0 ekā 1/1

evam 0 saptadaśa-kalābhiḥ 3/3 saha 0

yat 1/1 tiṣṭhati III/1 tat 1/1 sūkṣma-śarīram 1/1

श्रोत्रं त्वक्चक्षू रसना घ्राणमिति पञ्चज्ञानेन्द्रियाणि।

śrotraṃ tvakcakṣū rasanā ghrāṇamiti pañcajñānendriyāṇi ।

śrotram 1/1 tvak 1/1 cakṣuḥ 1/1 rasanā 1/1 ghrāṇam 1/1

iti 0 pañca-jñāna-indriyāṇi 1/3

श्रोत्रस्य दिग्देवता। त्वचो वायुः। चक्षुषः सूर्यः। रसनाया वरुणः।

घ्राणस्याश्विनौ। इति ज्ञानेन्द्रियदेवताः।

śrotrasya digdevatā । tvaco vāyuḥ । cakṣuṣaḥ sūryaḥ । rasanāyā varuṇaḥ । ghrāṇasyāśvinau । iti jñānendriyadevatāḥ ।

śrotrasya 6/1 dik 1/1 devatā 1/1

tvacaḥ 6/1 vāyuḥ 1/1

cakṣuṣaḥ 6/1 sūryaḥ 1/1

rasanāyāḥ 6/1 varuṇaḥ 1/1

ghrāṇasya 6/1 aśvinau 1/2

iti 0 jñāna-indriya-devatāḥ 1/3

श्रोत्रस्य विषयः शब्दग्रहणम्। त्वचो विषयः स्पर्शग्रहणम्। चक्षुषो विषयो रूपग्रहणम्। रसनाया विषयो रसग्रहणम्। घ्राणस्य विषयो गन्धग्रहणमिति।

śrotrasya viṣayaḥ śabdagrahaṇam । tvaco viṣayaḥ sparśagrahaṇam । cakṣuṣo viṣayo rūpagrahaṇam । rasanāyā viṣayo rasagrahaṇam । ghrāṇasya viṣayo gandhagrahaṇamiti ।

śrotrasya 6/1 viṣayaḥ 1/1 śabda-grahaṇam 1/1

tvacaḥ 6/1 viṣayaḥ 1/1 sparśa-grahaṇam 1/1

cakṣuṣaḥ 6/1 viṣayaḥ 1/1 rūpa-grahaṇam 1/1

rasanāyāḥ 6/1 viṣayaḥ 1/1 rasa-grahaṇam 1/1

ghrāṇasya 6/1 viṣayaḥ 1/1 gandha-grahaṇam 1/1 iti 0

वाक्पाणिपादपायूपस्थानीति पञ्चकर्मेन्द्रियाणि।

vākpāṇipādapāyūpasthānīti pañcakarmendriyāṇi ।

vāk-pāṇi-pāda-pāyu-upasthāni 1/3

iti 0 pañca-karma-indriyāṇi 1/3

वाचो देवता वह्निः। हस्तयोरिन्द्रः। पादयोर्विष्णुः। पायोर्मृत्युः। उपस्थस्य प्रजापतिः। इति कर्मेन्द्रियदेवताः।

vāco devatā vahniḥ । hastayorindraḥ । pādayorviṣṇuḥ । pāyormṛtyuḥ । upasthasya prajāpatiḥ । iti karmendriyadevatāḥ ।

vācaḥ 6/1 devatā 1/1 vahniḥ 1/1

hastayoḥ 6/2 indraḥ 1/1

pādayoḥ 6/2 viṣṇuḥ 1/1

pāyoḥ 6/1 mṛtyuḥ 1/1

upasthasya 6/1 prajāpatiḥ 1/1

iti 0 karma-indriya-devatāḥ 1/3

वाचो विषयो भाषणम्। पाण्योर्विषयो वस्तुग्रहणम्। पादयोर्विषयो गमनम्। पायोर्विषयो मलत्यागः। उपस्थस्य विषय आनन्द इति।

vāco viṣayo bhāṣaṇam । pāṇyorviṣayo vastugrahaṇam । pādayorviṣayo gamanam । pāyorviṣayo malatyāgaḥ । upasthasya viṣaya ānanda iti ।

vācaḥ 6/1 viṣayaḥ 1/ bhāṣaṇam 1/1

pāṇyoḥ 6/2 viṣayaḥ 1/1 vastu-grahaṇam 1/1

pādayoḥ 6/2 viṣayaḥ 1/1 gamanam 1/1

pāyoḥ 6/1 viṣayaḥ 1/1 mala-tyāgaḥ 1/1

upasthasya 6/1 viṣayaḥ 1/1 ānandaḥ 1/1 iti 0

1) - iii) कारणशरीरं किम् ?।

kāraṇaśarīraṃ kim ?।

अनिर्वाच्यानाद्यविद्यारूपं शरीरद्वयस्य कारणमात्रं सत्स्वरूपाज्ञानं निर्विकल्पकरूपं यदस्ति तत्कारणशरीरम्।

anirvācyānādyavidyārūpaṃ śarīradvayasya kāraṇamātraṃ satsvarūpājñānaṃ nirvikalpakarūpaṃ yadasti tatkāraṇaśarīram ।

kāraṇa-śarīraṃ 1/1 kim 1/1

anirvācya-anādi-avidyā-rūpam 1/1

śarīra-dvayasya 6/1 kāraṇa-mātram 1/1

sat-svarūpa-ajñānam 1/1

nirvikalpaka-rūpam 1/1

yat 1/1 asti III/1 tat 1/1 kāraṇa- śarīram 1/1

2) अवस्थात्रयं किम् ?।

avasthātrayaṃ kim ?।

जाग्रत्स्वप्नसुषुप्त्यवश्ताः।

jāgratsvapnasuṣuptyavaśtāḥ ।

avasthātrayam 1/1 kim 1/1

jāgrat-svapna-suṣupti-avaśtāḥ 1/3

2) - i) जाग्रदवस्था का ?।

jāgradavasthā kā ?।

श्रोत्रादिज्ञानेन्द्रियैः शब्दादिविषया ज्ञायन्त इति यत्सा जाग्रदवस्था।

स्थूलशरीराभिमान्यात्मा विश्व इत्युच्यते।

śrotrādijñānendriyaiḥ śabdādiviṣayā jñāyanta iti yatsā jāgradavasthā । sthūlaśarīrābhimānyātmā viśva ityucyate ।

jāgrat-avasthā 1/1 kā 1/1

śrotra-ādi-jñāna-indriyaiḥ 3/3 śabda-ādi-viṣayāḥ 1/3

jñāyante III/3 iti 0 yat 1/1

sā 1/1 jāgrat-avasthā 1/1

sthūla-śarīra-abhimāni-ātmā 1/1 viśvaḥ 1/1

iti 0 ucyate III/1

2) - ii) स्वप्नावस्था का ? इति चेत्।
svapnāvasthā kā ? iti cet ।

जाग्रदवस्थायां यद्दृष्टं यच्छ्रुतं तज्जनितवासनया निद्रासमये यः प्रपञ्चः प्रतीयते सा स्वप्नावस्था। सूक्ष्मशरीराभिमान्यात्मा तैजस इत्युच्यते।

jāgradavasthāyāṃ yaddṛṣṭaṃ yacchrutaṃ tajjanitavāsanayā nidrāsamaye yaḥ prapañcaḥ pratīyate sā svapnāvasthā । sūkṣmaśarīrābhimānyātmā taijasa ityucyate ।

svapna-avasthā 1/1 kā 1/1 iti 0 cet 0

jāgrat-avasthāyām 7/1 yat 1/1 dṛṣṭam 1/1

yat 1/1 śrutam 1/1 tat-janita-vāsanayā 3/1 nidrā-samaye 7/1

yaḥ 1/1 prapañcaḥ 1/1 pratīyate III/1

sā 1/1 svapna-avasthā 1/1

sūkṣma-śarīra-abhimāni-ātmā 1/1 taijasaḥ 1/1

iti 0 ucyate III/1

2) - iii) ततः सुषुप्त्यवस्था का ?।

tataḥ suṣuptyavasthā kā ?।

अहं किमपि न जानामि सुखेन मया निद्रानुभूयत इति सुषुप्त्यवस्था।

कारणशरीराभिमान्यात्मा प्राज्ञ इत्युच्यते।

ahaṃ kimapi na jānāmi sukhena mayā nidrānubhūyata iti suṣuptyavasthā । kāraṇaśarīrābhimānyātmā prājña ityucyate ।

tataḥ 0 suṣupti-avasthā 1/1 kā 1/1

aham 1/1 kimapi 0 na 0 jānāmi I/1

sukhena 0 mayā 3/1 nidrā 1/1 anubhūyate III/1

iti 0 suṣupti-avasthā 1/1

kāraṇa-śarīra-abhimāni-ātmā 1/1 prājñaḥ 1/1

iti 0 ucyate III/1

3) पञ्चकोशाः के ?।

pañcakośāḥ ke ?।

अन्नमयः प्राणमयो मनोमयो विज्ञानमय आनन्दमयश्चेति।

annamayaḥ prāṇamayo manomayo vijñānamaya ānandamayaśceti ।

pañcakośāḥ 1/3 ke 1/3

i) annamayaḥ 1/1

ii) prāṇamayaḥ 1/1

iii) manomayaḥ 1/1

iv) vijñānamayaḥ 1/1

v) ānandamayaḥ 1/1

ca 0 iti 0

3) - i) अन्नमयः कः ?।

annamayaḥ kaḥ ? ।

अन्नरसेनैव भूत्वान्नरसेनैव वृद्धिं प्राप्यान्नरूपपृथिव्यां यद् विलीयते

तदन्नमयः कोशः स्थूलशरीरम्।

annarasenaiva bhūtvānnarasenaiva vṛddhiṃ prāpyānnarūpapṛthivyāṃ yad vilīyate tadannamayaḥ kośaḥ sthūlaśarīram ।

annamayaḥ 1/1 kaḥ 1/1

anna-rasena 3/1 eva 0 bhūtvā 0

anna-rasena 3/1 eva 0 vṛddhim 2/1 prāpya 0

anna-rūpa-pṛthivyām 7/1 yat 1/1 vilīyate III/1

tat 1/1 annamayaḥ 1/1 kośaḥ 1/1 sthūla-śarīram 1/1

3) - ii) प्राणमयः कः ?।

prāṇamayaḥ kaḥ ?।

प्राणाद्याः पञ्चवायवो वागादीन्द्रियपञ्चकं प्राणमयः कोशः।

prāṇādyāḥ pañcavāyavo vāgādīndriyapañcakaṃ prāṇamayaḥ kośaḥ ।

prāṇamayaḥ 1/1 kaḥ 1/1

prāṇa-ādyāḥ 1/3 pañca-vāyavaḥ 1/3

vāk-ādi-indriya-pañcakam 1/1 prāṇamayaḥ 1/1 kośaḥ 1/1

3) - iii) मनोमयः कः ?।

manomayaḥ kaḥ ?।

मनश्च ज्ञानेन्द्रियपञ्चकं मिलित्वा यो भवति स मनोमयः कोशः।

manaśca jñānendriyapañcakaṃ militvā yo bhavati sa manomayaḥ kośaḥ ।

manomayaḥ 1/1 kaḥ 1/1

manaḥ 1/1 ca 0 jñāna-indriya-pañcakam 1/1 militvā 0

yaḥ 1/1 bhavati III/1 saḥ 1/1 manomayaḥ 1/1 kośaḥ 1/1

3) - iv) विज्ञानमयः कः ?।

vijñānamayaḥ kaḥ ? ।

बुद्धिर्ज्ञानेन्द्रियपञ्चकं मिलित्वा यो भवति स विज्ञानमयः कोशः।

buddhirjñānendriyapañcakaṃ militvā yo bhavati sa vijñānamayaḥ kośaḥ ।

vijñānamayaḥ 1/1 kaḥ 1/1

buddhiḥ 1/1 jñāna-indriya-pañcakam 1/1 militvā 0

yaḥ 1/1 bhavati III/1 saḥ 1/1 vijñānamayaḥ 1/1 kośaḥ 1/1

3) - v) आनन्दमयः कः ?।

ānandamayaḥ kaḥ ? ।

एवमेव कारणशरीरभूताविद्यास्थमलिनसत्त्वं प्रियादिवृत्तिसहितं सत्

आनन्दमयः कोशः।

evameva kāraṇaśarīrabhūtāvidyāsthamalinasattvaṃ priyādivṛttisahitaṃ sat ānandamayaḥ kośaḥ ।

ānandamayaḥ 1/1 kaḥ 1/1

evam 0 eva 0 kāraṇa-śarīra-bhūta-avidyāstha-malina-sattvam

1/1 priyādi-vṛtti-sahitam 1/1 sat 1/1 ānandamayaḥ 1/1

kośaḥ 1/1

एतत्कोशपञ्चकम्।

etatkośapañcakam ।

etat 1/1 kośapañcakam 1/1

मदीयं शरीरं मदीयाः प्राणाः मदीयं मनश्च मदीया बुद्धिर्मदीयमज्ञानमिति स्वेनैव ज्ञायते तद्यथा मदीयत्वेन ज्ञातं कटककुण्डलगृहादिकं स्वस्माद्भिन्नं तथा पञ्चकोशादिकं मदीयत्वेन ज्ञातमात्मा न भवति।

madīyaṃ śarīraṃ madīyāḥ prāṇāḥ madīyaṃ manaśca madīyā buddhirmadīyamajñānamiti svenaiva jñāyate tadyathā madīyatvena jñātaṃ kaṭakakuṇḍalagṛhādikaṃ svasmādbhinnaṃ tathā pañcakośādikaṃ madīyatvena jñātamātmā na bhavati ।

madīyam 1/1 śarīram 1/1 madīyāḥ 1/1 prāṇāḥ 1/1

madīyam 1/1 manaḥ 1/1 ca 0 madīyā 1/1 buddhiḥ 1/1

madīyam 1/1 ajñānam 1/1 iti 0 svena 3/1 eva 0 jñāyate III/1

tat 1/1 yathā 0 madīyatvena 3/1 jñātam 1/1

kaṭaka-kuṇḍala-gṛha-ādikam 1/1

svasmāt 5/1 bhinnam 1/1

tathā 0 pañcakośa-ādikam 1/1 madīyatvena 3/1 jñātam 1/1

ātmā 1/1 na 0 bhavati III/1

आत्मा तर्हि कः ?।
ātmā tarhi kaḥ ?।
4) सच्चिदानन्दस्वरूपः।
saccidānandasvarūpaḥ ।

ātmā 1/1 tarhi 0 kaḥ 1/1

sat-cit-ānanda-svarūpaḥ 1/1

4) - i) सत्किम् ?।
satkim ?।
कालत्रयेऽपि तिष्ठतीति सत्।
kālatraye'pi tiṣṭhatīti sat ।

sat 1/1 kim 1/1

kāla-traye 7/1 api 0 tiṣṭhati III/1 iti 0 sat 1/1

4) - ii) चित्किम् ?।
citkim ?।
ज्ञानस्वरूपः।
jñānasvarūpaḥ ।

cit 1/1 kim 1/1

jñāna-svarūpaḥ 1/1

4) - iii) आनन्दः कः ?।
ānandaḥ kaḥ ? ।

सुखस्वरूपः।
sukhasvarūpaḥ ।

ānandaḥ 1/1 kaḥ 1/1

sukha-svarūpaḥ 1/1

एवं सच्चिदानन्दस्वरूपं स्वात्मानं विजानीयात्।
evaṃ saccidānandasvarūpaṃ svātmānaṃ vijānīyāt ।

evam 0 sat-cit-ānanda-svarūpam 2/1 svātmānam 2/1

vijānīyāt III/1

अथ चतुर्विंशतितत्त्वोत्पत्तिप्रकारं वक्ष्यामः।
atha caturviṃśatitattvotpattiprakāraṃ vakṣyāmaḥ ।

atha 0

catur-viṃśati-tattva-utpatti-prakāram 2/1 vakṣyāmaḥ I/3

ब्रह्माश्रया सत्त्वरजस्तमोगुणात्मिका मायास्ति
brahmāśrayā sattvarajastamoguṇātmikā māyāsti ।

brahma-āśrayā 1/1 sattva-rajas-tamas-guṇa-ātmikā 1/1

māyā 1/1 asti III/1

तत आकाशः सम्भूतः। आकाशाद्वायुः। वायोस्तेजः। तेजस आपः। अद्भ्यः पृथिवी।
tata ākāśaḥ sambhūtaḥ । ākāśādvāyuḥ । vāyostejaḥ । tejasa āpaḥ । adbhyaḥ pṛthivī ।

tataḥ 0 ākāśaḥ 1/1 sambhūtaḥ 1/1।

ākāśāt 5/1 vāyuḥ 1/1। vāyoḥ 5/1 tejaḥ 1/1 ।

tejasaḥ 5/1 āpaḥ 1/1। adbhyaḥ 5/3 pṛthivī 1/1 ।

एतेषां पञ्चतत्त्वानां मध्य आकाशस्य सात्त्विकांशाच्छ्रोत्रेन्द्रियं सम्भूतम्।
eteṣāṃ pañcatattvānāṃ madhya ākāśasya sāttvikāṃśācchrotrendriyaṃ sambhūtam ।

eteṣām 6/3 pañca-tattvānām 6/3 madhye 7/1

ākāśasya 6/1 sāttvika-aṃśāt 5/1

śrotra-indriyam 1/1 sambhūtam 1/1

वायोः सात्त्विकांशात्त्वगिन्द्रियं संभूतम्।
vāyoḥ sāttvikāṃśāttvagindriyaṃ saṃbhūtam ।

vāyoḥ 6/1 sāttvika-aṃśāt 5/1

tvak-indriyam 1/1 saṃbhūtam 1/1

अग्नेः सात्त्विकांशाच्चक्षुरिन्द्रियं सम्भूतम्।
agneḥ sāttvikāṃśāccakṣurindriyaṃ sambhūtam ।

agneḥ 6/1 sāttvika-aṃśāt 5/1

cakṣus-indriyam 1/1 sambhūtam 1/1

जलस्य सात्त्विकांशाद्रसनेन्द्रियं सम्भूतम्।
jalasya sāttvikāṃśādrasanendriyaṃ sambhūtam ।

jalasya 6/1 sāttvika-aṃśāt 5/1

rasanā-indriyam 1/1 sambhūtam 1/1

पृथिव्याः सात्त्विकांशाद्घ्राणेन्द्रियं सम्भूतम्।
pṛthivyāḥ sāttvikāṃśādghrāṇendriyaṃ sambhūtam ।

pṛthivyāḥ 6/1 sāttvika-aṃśāt 5/1

ghrāṇa-indriyam 1/1 sambhūtam 1/1

एतेषां पञ्चतत्त्वानां समष्टिसात्त्विकांशाद् मनोबुध्यहंकारचित्तान्तःकरणानि सम्भूतानि।

eteṣāṃ pañcatattvānāṃ samaṣṭisāttvikāṃśād manobuddhyahaṃkāracittāntaḥkaraṇāni sambhūtāni ।

eteṣām 6/3 pañca-tattvānām 6/3

samaṣṭi- sāttvika-aṃśāt 5/1

manas-buddhi-ahaṃkāra-citta-antaḥkaraṇāni 1/3

sambhūtāni 1/3

सङ्कल्पविकल्पात्मकं मनः। निश्चयात्मिका बुद्धिः। अहङ्कर्ताहङ्कृतिः। चिन्तनकर्तृ चित्तम्।

saṅkalpavikalpātmakaṃ manaḥ । niścayātmikā buddhiḥ । ahaṅkartāhaṅkṛtiḥ । cintanakartṛ cittam ।

saṅkalpa-vikalpa-ātmakam 1/1 manaḥ 1/1

niścaya-ātmikā 1/1 buddhiḥ 1/1

ahaṅkartā 1/1 ahaṅkṛtiḥ 1/1

cintana-kartṛ 1/1 cittam 1/1

मनसो देवता चन्द्रमाः। बुद्धेर्ब्रह्मा। अहङ्कारस्य रुद्रः। चित्तस्य वासुदेवः।
manaso devatā candramāḥ । buddherbrahmā । ahaṅkārasya rudraḥ । cittasya vāsudevaḥ ।

manasaḥ 6/1 devatā 1/1 candramāḥ 1/1

buddheḥ 6/1 brahmā 1/1

ahaṅkārasya 6/1 rudraḥ 1/1

cittasya 6/1 vāsudevaḥ 1/1

एतेषां पञ्चतत्त्वानां मध्य आकाशस्य राजसांशाद्वागिन्द्रियं सम्भूतम्।
eteṣāṃ pañcatattvānāṃ madhya ākāśasya rājasāṃśādvāgindriyaṃ sambhūtam ।

eteṣām 6/3 pañca-tattvānām 6/3 madhye 7/1

ākāśasya 6/1 rājasa-aṃśāt 5/1

vāk-indriyam 1/1 sambhūtam 1/1

वायोः राजसांशात्पाणीन्द्रियं सम्भूतम्।
vāyoḥ rājasāṃśātpāṇīndriyaṃ sambhūtam ।

vāyoḥ 6/1 rājasa-aṃśāt 5/1

pāṇi-indriyam 1/1 saṃbhūtam 1/1

वह्ने राजसांशात्पादेन्द्रियं सम्भूतम्।
vahne rājasāṃśātpādendriyaṃ sambhūtam ।

vahneḥ 6/1 rājasa-aṃśāt 5/1

pāda-indriyam 1/1 sambhūtam 1/1

जलस्य राजसांशदुपस्थेन्द्रियं सम्भूतम्।
jalasya rājasāṃśadupasthendriyaṃ sambhūtam ।

jalasya 6/1 rājasa-aṃśāt 5/1

upastha-indriyam 1/1 sambhūtam 1/1

पृथिव्या राजसांशाद् गुदेन्द्रियं सम्भूतम्।
pṛthivyā rājasāṃśād gudendriyaṃ sambhūtam ।

pṛthivyāḥ 6/1 rājasa-aṃśāt 5/1

guda-indriyam 1/1 sambhūtam 1/1

एतेषां समष्टिराजसांशात्पञ्चप्राणाः संभूताः।
eteṣāṃ samaṣṭirājasāṃśātpañcaprāṇāḥ saṃbhūtāḥ ।

eteṣām 6/3 samaṣṭi-rājasa-aṃśāt 5/1
pañca-prāṇāḥ 1/3 saṃbhūtāḥ 1/3

एतेषां पञ्चतत्त्वानां तामसांशात्पञ्चीकृतपञ्चतत्त्वानि भवन्ति।

eteṣāṃ pañcatattvānāṃ tāmasāṃśātpañcīkṛtapañcatattvāni bhavanti ।

eteṣām 6/3 pañca-tattvānām 6/3 tāmasa-āṃśāt 5/1

pañcīkṛta-pañca-tattvāni 1/3 bhavanti III/3

पञ्चीकरणं कथमिति चेत्।

pañcīkaraṇaṃ kathamiti cet ।

एतेषां पञ्चमहाभूतानां तामसांशस्वरूपमेकमेकं भूतं द्विधा विभज्यैकमेकमर्धं पृतक्तूष्णीं व्यवस्थाप्य अपरमपरमर्धं चतुर्धा विभज्य स्वार्धभिन्नेषु अर्धेषु स्वभागचतुष्टयसंयोजनं पञ्चीकरणं भवति।

eteṣāṃ pañcamahābhūtānāṃ tāmasāṃśasvarūpam ekamekaṃ bhūtaṃ dvidhā vibhajyaikamekamardhaṃ pṛtaktūṣṇīṃ vyavasthāpya aparamaparamardhaṃ caturdhā vibhajya svārdhabhinneṣu ardheṣu svabhāgacatuṣṭaya-saṃyojanaṃ pañcīkaraṇaṃ bhavati ।

pañcī-karaṇam 1/1 katham 0 iti 0 cet 0

eteṣām 6/3 pañca-mahābhūtānām 6/3

tāmasa-aṃśa-svarūpam 2/1

ekam 2/1 ekam 2/1 bhūtam 2/1 dvidhā 0 vibhajya 0

ekam 2/1 ekam 2/1 ardham 2/1 pṛtak 0 tūṣṇīm 0

vyavasthāpya 0

aparam 2/1 aparam 2/1 ardham 2/1 caturdhā 0 vibhajya 0

sva-ardha-bhinneṣu 7/3 ardheṣu 7/3

sva-bhāga-catuṣṭaya-saṃyojanam 1/1

pañcīkaraṇam 1/1 bhavati III/1

एतेभ्यः पञ्चीकृतपञ्चमहाभूतेभ्यः स्थूलशरीरं भवति।
etebhyaḥ pañcīkṛtapañcamahābhūtebhyaḥ sthūlaśarīraṃ bhavati ।

etebhyaḥ 5/3 pañcī-kṛta-pañca-mahābhūtebhyaḥ 5/3

sthūla-śarīram 1/1 bhavati III/1

एवं पिण्डब्रह्माण्डयोरैक्यं सम्भूतम्।
evaṃ piṇḍabrahmāṇḍayoraikyaṃ sambhūtam ।

evam 0 piṇḍa-brahmāṇḍayoḥ 6/2 aikyam 1/1

sambhūtam 1/1

स्थूलशरीराभिमानि जीवनामकं ब्रह्मप्रतिबिम्बं भवति। स एव जीवः प्रकृत्या स्वस्मादीश्वरं भिन्नत्वेन जानाति।

sthūlaśarīrābhimāni jīvanāmakaṃ brahmapratibimbaṃ bhavati । sa eva jīvaḥ prakṛtyā svasmādīśvaraṃ bhinnatvena jānāti ।

sthūla-śarīra-abhimāni 1/1 jīvanāmakam 1/1 brahma-

pratibimbam 1/1 bhavati III/1 saḥ 1/1 eva 0 jīvaḥ 1/1

prakṛtyā 3/1 svasmāt 5/1 īśvaram 2/1 bhinnatvena 3/1

jānāti III/1

अविद्योपाधिः सन्नात्मा जीव इत्युच्यते।

avidyopādhiḥ sannātmā jīva ityucyate ।

avidyā-upādhiḥ 1/1 san 1/1 ātmā 1/1 jīvaḥ 1/1

iti 0 ucyate III/1

मायोपाधिः सन्नात्मेश्वर इत्युच्यते।

māyopādhiḥ sannātmeśvara ityucyate ।

māyā-upādhiḥ 1/1 san 1/1 ātmā 1/1

īśvaraḥ 1/1 iti 0 ucyate III/1

एवमुपाधिभेदाज्जीवेश्वरभेददृष्टिर्यावत्पर्यन्तं तिष्ठति तावत्पर्यन्तं जन्ममरणादिरूपसंसारो न निवर्त्तते।

evamupādhibhedājjīveśvarabhedadṛṣṭiryāvatparyantaṃ tiṣṭhati tāvatparyantaṃ janmamaraṇādirūpasaṃsāro na nivartate ।

evam 0 upādhi-bhedāt 5/1 jīva-iśvara-bheda-dṛṣṭiḥ 1/1

yāvat-paryantam 0 tiṣṭhati III/1

tāvat-paryantam 0 janma-maraṇa-ādi-rūpa-saṃsāraḥ 1/1

na 0 nivartate III/1

तस्मात्कारणात् न जीवेश्वरयोर्भेदबुद्धिः स्वीकार्या।

tasmātkāraṇāt na jīveśvarayorbhedabuddhiḥ svīkāryā ।

tasmāt 5/1 kāraṇāt 5/1

na 0 jīva-īśvarayoḥ 6/2 bheda-buddhiḥ 1/1 svī-kāryā 1/1

ननु साहङ्कारस्य किञ्चिज्ज्ञस्य जीवस्य निरहङ्कारस्य सर्वज्ञस्येश्वरस्य तत्त्वमसीति महावाक्यात् कथमभेदबुद्धिः स्यात् उभयोर्विरुद्धधर्माक्रान्तत्वात्।

nanu sāhaṅkārasya kiñcijjñasya jīvasya nirahaṅkārasya sarvajñasyeśvarasya tattvamasīti mahāvākyāt kathamabhedabuddhiḥ syāt ubhayorviruddhadharmākrāntatvāt ।

nanu 0

sa-ahaṅkārasya 6/1 kiñcit-jñasya 6/1 jīvasya 6/1

nir-ahaṅkārasya 6/1 sarvajñasya 1/1 īśvarasya 6/1

tat 1/1 tvam 1/1 asi II/1 iti 0 mahāvākyāt 5/1

katham 0 abheda-buddhiḥ 1/1 syāt III/1

ubhayoḥ 6/2 viruddha-dharma-ākrāntatvāt 5/1

इति चेन्न।

iti cenna ।

iti 0 cet 0 na 0

स्थूलसूक्ष्मशरीराभिमानी त्वम्पदवाच्यार्थः। उपाधिविनिर्मुक्तं समाधिदशासम्पन्नं शुद्धं चैतन्यं त्वम्पदलक्ष्यार्थः।

sthūlasūkṣmaśarīrābhimānī tvampadavācyārthaḥ । upādhivinirmuktaṃ samādhidaśāsampannaṃ śuddhaṃ caitanyaṃ tvampadalakṣyārthaḥ ।

sthūla-sūkṣma-śarīra-abhimānī 1/1

tvam-pada-vācya-arthaḥ 1/1 ।

upādhi-vinirmuktam 1/1 samādhi-daśā-sampannam 1/1

śuddham 1/1 caitanyam 1/1 tvam-pada-lakṣya-arthaḥ 1/1

एवं सर्वज्ञत्वादिविशिष्ट ईश्वरः तत्पदवाच्यार्थः। उपाधिशून्यं शुद्धचैतन्यं तत्पदलक्ष्यार्थः।

evaṃ sarvajñatvādiviśiṣṭa īśvaraḥ tatpadavācyārthaḥ । upādhiśūnyaṃ śuddhacaitanyaṃ tatpadalakṣyārthaḥ ।

evam 0 sarvajñatva-ādi-viśiṣṭaḥ 1/1 īśvaraḥ 1/1

tat-pada-vācya-arthaḥ 1/1।

upādhi-śūnyam 1/1 śuddha-caitanyam 1/1

tat-pada-lakṣya-arthaḥ 1/1

एवं च जीवेश्वरयोश्चैतन्यरूपेणाभेदे बाधकाभावः।

evaṃ ca jīveśvarayoścaitanyarūpeṇābhede bādhakābhāvaḥ ।

evam 0 ca 0 jīva-īśvarayoḥ 6/2 caitanya-rūpeṇa 3/1

abhede 7/1 bādhaka-abhāvaḥ 1/1

एवं च वेदान्तवाक्यैः सद्गुरूपदेशेन च सर्वेष्वपि भूतेषु येषां ब्रह्मबुद्धिरुत्पन्ना ते जीवन्मुक्ता भवन्ति।

evaṃ ca vedāntavākyaiḥ sadgurūpadeśena ca sarveṣvapi bhūteṣu yeṣāṃ brahmabuddhirutpannā te jīvanmuktā bhavanti ।

evam 0 ca 0 vedānta-vākyaiḥ 3/3

sadguru-upadeśena 3/1 ca 0

sarveṣu 7/3 api 0 bhūteṣu 7/3

yeṣām 6/3 brahma-buddhiḥ 1/1 utpannā 1/1

te 1/3 jīvanmuktāḥ 1/3 bhavanti III/3

ननु जीवन्मुक्तः कः ?।
nanu jīvanmuktaḥ kaḥ ? ।
यथा देहोऽहं पुरुषोऽहं ब्राह्मणोऽहं शूद्रोऽहमस्मीति दृढनिश्चयस्तथा नाहं ब्राह्मणो न शूद्रो न पुरुषः किन्त्वसङ्गः सच्चिदानन्दस्वरूपः प्रकाशरूपः सर्वान्तर्यामी चिदाकाशरूपोऽस्मीति दृढनिश्चयरूपापरोक्षज्ञानवान् जीवन्मुक्तः।
yathā deho'haṃ puruṣo'haṃ brāhmaṇo'haṃ śūdro'hamasmīti dṛḍhaniścayastathā nāhaṃ brāhmaṇo na śūdro na puruṣaḥ kintvasaṅgaḥ saccidānandasvarūpaḥ prakāśarūpaḥ sarvāntaryāmī cidākāśarūpo'smīti dṛḍhaniścayarūpāparokṣajñānavān jīvanmuktaḥ ।

nanu 0 jīvanmuktaḥ 1/1 kaḥ 1/1

yathā 0 dehaḥ 1/1 aham 1/1 puruṣaḥ 1/1 aham 1/1

brāhmaṇaḥ 1/1 aham 1/1 śūdraḥ 1/1 aham 1/1 asmi I/1

iti 0 dṛḍha-niścayaḥ 1/1

tathā 0 na 0 aham 1/1 brāhmaṇaḥ 1/1 na 0 śūdraḥ 1/1

na 0 puruṣaḥ 1/1 kintu 0

asaṅgaḥ 1/1 saccidānanda-svarūpaḥ 1/1 prakāśa-rūpaḥ 1/1

sarva-antaryāmī 1/1 cidākāśa-rūpaḥ 1/1 asmi I/1

iti 0 dṛḍha-niścaya-rūpa-aparokṣa-jñānavān 1/1

jīvanmuktaḥ 1/1

ब्रह्मैवाहमस्मीत्यपरोक्षज्ञानेन निखिलकर्मबन्धविनिर्मुक्तिः स्यात्।

brahmaivāhamasmītyaparokṣajñānena
nikhilakarmabandhavinirmuktiḥ syāt ।

brahma 1/1 eva 0 aham 1/1 asmi I/1

iti 0 aarokṣa-jñānena 3/1

nikhila-karma-bandha-vinirmuktiḥ 1/1 syāt III/1

कर्माणि कति विधानि सन्तीति चेत्।
आगामिसञ्चितप्रारब्धभेदेन त्रिविधानि सन्ति।

karmāṇi kati vidhāni santīti cet ।
āgāmisañcitaprārabdhabhedena trividhāni santi ।

karmāṇi 1/3 kati 1/3 vidhāni 1/3 santīti III/3 cet 0

āgāmi-sañcita-prārabdha-bhedena 3/1

tri-vidhāni 1/3santi III/3

1) आगामिकर्म किम् ?।
āgāmikarma kim ?।
ज्ञानोत्पत्त्यनन्तरं ज्ञानिदेहकृतं पुण्यपापरूपं कर्म यदस्ति तदागामीत्यभिधीयते।
jñānotpattyanantaraṃ jñānidehakṛtaṃ puṇyapāparūpaṃ karma yadasti tadāgāmītyabhidhīyate ।

āgāmi-karma 1/1 kim 1/1

jñāna-utpatti-anantaram 0 jñāni-deha-kṛtam 1/1

puṇya-pāpa-rūpam 1/1 karma 1/1

yat 1/1 asti III/1 tat 1/1 āgāmi 1/1 iti 0 abhidhīyate III/1

2) सञ्चितं कर्म किम् ?।
sañcitaṃ karma kim ?।
अनन्तकोटिजन्मनां बीजभूतं सद् यत् कर्मजातं पूर्वार्जितं तिष्ठति तत् सञ्चितं ज्ञेयम्।
anantakoṭijanmanāṃ bījabhūtaṃ sad yat karmajātaṃ pūrvārjitaṃ tiṣṭhati tat sañcitaṃ jñeyam ।

sañcitam 1/1 karma 1/1 kim 1/1

ananta-koṭi-janmanām 6/3 bīja-bhūtam 1/1 sat 1/1

yat 1/1 karma-jātam 1/1 pūrva-arjitam 1/1 tiṣṭhati III/1

tat 1/1 sañcitam 1/1 jñeyam 1/1

3) प्रारब्धं कर्म किमिति चेत्।

prārabdhaṃ karma kimiti cet ।

इदं शरीरमुत्पाद्येह लोक एवं सुखदुःखादिप्रदं यत्कर्म तत्प्रारब्धम्। भोगेन नष्टं भवति। प्रारब्धकर्मणां भोगादेव क्षय इति।

idaṃ śarīramutpādyeha loka evaṃ sukhaduḥkhādipradaṃ yatkarma tatprārabdham । bhogena naṣṭaṃ bhavati । prārabdhakarmaṇāṃ bhogādeva kṣaya iti ।

prārabdham 1/1 karma 1/1 kim 1/1 iti 0 cet 0

idam 1/1 śarīram 1/1 utpādya 0

iha 0 loke 7/1 evam 0 sukha-duḥkha-ādi-pradam 1/1

yat 1/1 karma 1/1 tat 1/1 prārabdham 1/1।

bhogena 3/1 naṣṭam 1/1 bhavati III/1।

prārabdha-karmaṇām 6/3 bhogāt 5/1 eva 0 kṣayaḥ 1/1 iti 0

सञ्चितं कर्म ब्रह्मैवाहमस्मीति निश्चयज्ञानेन नश्यति।
sañcitaṃ karma brahmaivāhamasmīti niścayajñānena naśyati
।

sañcitam 1/1 karma 1/1

brahma 1/1 eva 0 aham 1/1 asmi I/1 iti 0

niścaya-jñānena 3/1 naśyati III/1

आगामिकर्मापि ज्ञानेन नश्यति। किञ्चागामिकर्मणां नलिनीदलगतजलवज्ज्ञानिनां सम्बन्धो नास्ति।
āgāmikarmāpi jñānena naśyati । kiñcāgāmikarmaṇāṃ nalinīdalagatajalavajjñāninām sambandho nāsti ।

āgāmikarma 1/1 api 0 jñānena 3/1 naśyati III/1।

kiñca 0

āgāmi-karmaṇām 6/3 nalinī-dala-gata-jalavat 0

jñāninām 6/3 sambandhaḥ na 0 asti III/1

किञ्च ये ज्ञानिनं स्तुवन्ति भजन्त्यर्चयन्ति तान्प्रति ज्ञानिकृतमागामिपुण्यं गच्छति।

kiñca ye jñāninaṃ stuvanti bhajantyarcayanti tānprati jñānikṛtamāgāmipuṇyaṃ gacchati ।

kiñca 0 ye 1/3 jñāninam 2/1

stuvanti III/3 bhajanti III/3 arcayanti III/3

tān 2/3 prati 0

jñāni-kṛtam 1/1 āgāmi-puṇyam 1/1 gacchati III/1

ये ज्ञानिनं निन्दन्ति द्विषन्ति दुःखप्रदानं कुर्वन्ति तान्प्रति ज्ञानिकृतं सर्वमागामि क्रियमाणं यदवाच्यं कर्म पापात्मकं तद्गच्छति।

ye jñāninaṃ nindanti dviṣanti duḥkhapradānaṃ kurvanti tānprati jñānikṛtaṃ sarvamāgāmi kriyamāṇaṃ yadavācyaṃ karma pāpātmakaṃ tadgacchati ।

ye 1/3 jñāninam 2/1 nindanti III/3 dviṣanti III/3

duḥkha-pradānam 2/1 kurvanti III/3

tān 2/3 prati 0

jñāni-kṛtam 1/1 sarvam 1/1 āgāmi 1/1 kriyamāṇam 1/1

yat 1/1 avācyam 1/1 karma 1/1 pāpa-ātmakam 1/1

tat 1/1 gacchati III/1

तथा च आत्मवित्संसारं तीर्त्वा ब्रह्मानन्दमिहैव प्राप्नोति।
tathā ca ātmavitsaṃsāraṃ tīrtvā brahmānandamihaiva prāpnoti ।

tathā 0 ca 0 ātma-vit 1/1 saṃsāram 2/1 tīrtvā 0 brahma-

ānandam 2/1 iha 0 eva 0 prāpnoti III/1

तरति शोकमात्मविदिति श्रुतेः।
tarati śokamātmaviditi śruteḥ ।

tarati III/1 śokam 2/1 ātma-vit 1/1 iti 0 śruteḥ 5/1

तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा ज्ञानसम्प्राप्तिसमये मुक्तोऽसौ विगताशय इति स्मृतेश्च।
tanuṃ tyajatu vā kāśyāṃ śvapacasya gṛhe'thavā jñānasamprāptisamaye mukto'sau vigatāśaya iti smṛteśca ।

tanum 2/1 tyajatu III/1 vā 0 kāśyām 7/1

śva-pacasya 6/1 gṛhe 7/1

athavā 0 jñāna-samprāpti-samaye 7/1

muktaḥ 1/1 asau 1/1 vigata-āśayaḥ 1/1

iti 0 smṛteḥ 5/1 ca 0

इति तत्त्वबोधप्रकरणं समाप्तम्॥

iti tattvabodhaprakaraṇaṃ samāptam ||

iti 0 tattvabodha-prakaraṇam 1/1 samāptam 1/1||